# अथ सामप्रकाशनं प्रारम्भः

गजवदनचरणकमलं नत्वासामप्रकाशनं ग्रन्थम् ।
रचयति सामसमूहात्प्रीति करस्सारमुद्धृत्य १
यद्यपि मयानिबद्धो लक्षणनिवहस्य दर्पणे साम्नः ।
एकद्वित्रिप्रभृतिभिरुक्तिभिरत्र प्रकीर्तितं भवता २
संत्वाहिन्वेति कथितमृग्वर्जितमेकमेवात्र ।
वेदेगाने स्तोभादिनिर्म्मितमस्मान्नकथितमित्यपरम् १
पञ्च ग्रहणं पञ्चपदं विवृत्तिकञ्च समाप्यातं वेदे यस्ते
नूनमिति सामैकमेव नान्यत्र १ एकं सप्तस्वरयुतं वेदे
सामप्रकीर्तितम् । मोषुत्वा वा फतश्च न द्वितीयमिति
कौथुमे १ एकं पवस्व सोमेति महे दक्षायसंयुतं ।
विवृत्तिरहितं सामकमित्यस्याक्षरः स्मृतः १
वेदेष्टग्रहणं चाष्टपदं चाष्टविवृत्तिकम् । प्रोक्तमेकं
प्रयद्धा उ नेदृशं विद्यते क्वचित् १ सन्तन्येषाहा उ
त्रचमेकं वेदेप्रकीर्तितम् । न वैवग्रहणं चात्र वेदे
नव विवृत्तिकम् । एकं नवपदं सामप्रयोराया इ
प्रकीर्तितम् १ सामद्वयं वेदगाने द्विस्वरं परिकीर्तितं २
पोषुजातमादिम मर्षासोमादिमन्तथा २ अथ
क्रुष्टस्वरत्रयं वेदे सामयथामक्रमोषु त्वेति द्वयं
प्रोक्तमेकमिन्द्रसुतेषु च ३ पुनरुक्तं पादमेकमादावन्ते
यथाक्रमम् । उपनोहरिभिस्सुतं मान इन्द्रपरावृणात् ।
तरत्समन्दीधावति वेदे प्रोक्तमिति त्रयम् ३
अतीनिधनसंयुक्तमत्रसामचतुष्टयम् । द्वितीयमग्निं
वा प्रोक्तमरमश्वायचादिमम् । ये ते पंथा अधो
दिवो यस्य त्यच्चां तृतीयकम् ४ एकविवृत्तिकमुक्तं

वेदे सामचतुष्टयम् । तमिन्द्रं वाजयामसी त्याद्यं गव्योषुणस्तथा । परिप्रधन्वाद्द्वितीयमिन्द्रो विश्वस्य रादिमम् ४ षड्ग्रहणं षट्पदञ्च षड्विववृत्तिकमुच्यते । प्रेष्ठं वो हा उ यत्सोममा ५ इन्द्रविष्णवा इ । अपामीवा मपाविर्म्मार्या वेदेऽत्र चतुष्टयम् ४ प्रस्तावपञ्चकं प्रोक्तं वेदे गाने यथा क्रमम् । कनिष्ठानामिका मद्ध्या तर्जन्युक्थ समुद्भवम् । अग्निं होता चतुष्टयं तवत्यं नर्यमित्यपि ५ असंपूर्णानि कथ्यन्ते वेदे सामानि षड्यथा । मानो हृणीथा युगलं यस्सुहोता विवर्जितम् । अग्ने त्वन्नो द्वितीयञ्च चतुर्थञ्च विवर्जितम् । वरूथ्य इति शब्दो नधारा पृष्ठविवर्जितंम् । अयारुचाद्वयमिति संपूर्णा ऋच आर्चिके । ६ अग्न आ याहि वीतये अग्निर्वृत्राणि जंघनत् । अग्निस्तिग्मेन शोचिषा ह्यग्ने त्वं नोन्तमस्तथा । इत ऊतीवोकजरं पुरोजितीव इत्यपि । अकार ओत्वमेतेषु षट्सु सामप्रकीर्तितम् ६ शुक्रन्ते अन्यदित्यस्मिन्निडामग्ने प्यतः परं । अवद्रप्सो अंशुमतीमुपोषुशृणुहीगिरः । पुनाच दशमे सोमः पवतेऽत्र द्वितीयके । अभीनो वौहोजसेति स्तोभे सप्ताचलं स्मृतम् ७ ऊकारो निधनं वेय गाने सप्त यथा क्रमम् । तं गूर्द्धयाद्ये च पिबासु तान्ते धियसं युतम् । आत्वा सह तृतीये च तमु अभि द्वितीयके । एतो न्विन्द्रं सखायस्मिन्नुच्चाते नवमे तथा । प्रसोमदे चतुर्थे च प्रोक्तमेतेषु सामसु ७ यस्योदाहरणं नास्ति

तस्य संख्या क्रमो नहि । अष्टादि संख्यानाप्यत्र
याप्राप्तासैवकीर्तिता । वेये सामदशैवोक्तं दराडो
पानिधनान्वितम् । उपह्वरे गिरीणामित्येवैन्द्रप्रक्षुका
सुचिम् । प्रमित्रायमान इन्द्रेत्ये तयोः प्रथमं ततः ।
वयमेनाद्वितीयञ्च को अद्ययुङ्त इत्यपि । एषब्रह्मेति
पञ्चममुपप्रक्षततः परम् । अर्चन्त्यर्कम्मरुत इत्यूर्जामित्र
इतीरितं १०
ग्रहणेन विना वेये सामानि द्वादशैव हि । प्रव
इन्द्रा द्वयं योनिरिन्द्रं नर इतीरितम् । इममीत्यन्तिमं
काकमिन्द्रो विश्वा द्वितीयकम् । यस्ते मदो वरे
द्वयमसाव्यमिति चाष्टमम् । पवसमध्वभिद्युम्नमे
तयोश्च द्वितीयकम् १२
अच्छानप्त्रे सहोवे तिस्वातोहा इ समानि च ।
पदान्यत्र प्रकथ्यन्ते वेयगाने त्रयोदश । आच्छा २
नाप्त्रे उ ३ । प्रास्तो उमाया २३ । दा इवा २
आवाऽ २३ । वार्षी उष्ठामू २३ । माहा उन्माही
२३ । वाच्चा उस्ताच्ची २३त् । हूवे । उमावा
२३ । साऽकधाऽ उःकारवां २३ । नीचाद्यम् ।
नाजा उतामाऽ २३ आ इन्द्रा उत्वा द्या २३ । दा
इवा उवा इरा २३ । वा इश्वा उवासू २३ । आमा
उर्तात्वा २३ १३ वेयगाने समाख्याता आउवा ये
त्रयोदश । कयाष्ठामूश्नुहाषणागिरामनादयाश्नथा ।
घजामहास्यदानिबाक्षितात्रयोदशे त्यतः १३ पञ्चदश
वेयगाने कथिताः स्थितसंधयः । अदर्शिगा विशो

विशो अग्नेवाजद्वितीयके । अभिप्रगोपतिम्मद्ध्येन
क्येनाकीति कीर्तितः । अरन्त इन्द्रश्रवसे तं वो दस्म
चतुर्त्थके । इमा उत्वा तिवर्गाद्ये अत्तेदधामि सप्तमे ।
आते अग्ने द्वितीये च ततः स्वादिष्ठयाष्टमे । इन्दुः
पविद्वितीये च परीतो पञ्चषष्ठके । सोम उष्वाण
इत्यन्ते एषागायत्र पार्श्वके १५ वेये पञ्चदश प्रोक्तं
वा औहोवेति मद्ध्यतः । शन्नः परे प्रकेपरेऽद्यनो
देवद्वितीयके । आत्राद्येऽभित्वापूर्वेति जगृह्माते
तृतीयके । पञ्चमे च परिस्वाना स इन्दव द्वितीयके ।
अयावीताऽऽपवस्वाभि प्रियापञ्चके तथा । पवित्रन्ते
द्वितीये च प्रधन्वा युग्मतुर्ययोः । सोमः पुना द्वितीये
च वाशब्दः परिकीर्तितः १५
दीप्तयुक्तं सप्तदश वेये सामप्रकीर्तितम् । अभित्वा
वृषभाद्ये च य इन्द्रचमसेऽग्रिमं । वामदेव्ये यथा
त्वासहस्रमिति चतुर्थकम् । शग्ध्यूतृतीयं मोषुत्वा
द्वितीयं क्रुष्टशेषजम् । नाके सुवर्णमित्यात्वा सखाय
इत्यतः परम् । गायन्ति त्वेति तृतीयं प्रव इन्द्राय
वृत्रहन् । अग्निं होतारमित्याद्यमिं दुःपविष्टचेतनः
आद्यं त्वस्मात् प्रसोमदे तुर्त्थश्चाथ पुरोजिती । प्रथमञ्च
द्वितीयञ्च प्राणाशिशुरतः परम् । द्वितीयञ्च तृतीयञ्च
कश्चिद्दीप्ता श्रुतिर्वदेत् १७
यदार्चिके ह्रस्वमुक्तं विंशत्याख्यमतः परम् ।
वेये सग्रहणं दीर्घं प्रत्युत्क्रमयुतं च यत् ।
प्रप्राद्वयममार्तिय प्रवायामुञ्जिहा ततः । न स्वसरेषु

धेनवा इन्द्रांसबाधयुग्मकम् ।
तमार्भ्वसामवायद्दानज्येष्ठममार्तियं मदम् ।
आरांगमाद्वयमतः पवमानाभियर्षसि ।
मनीषिणो द्वयं यस्मादिन्द्रेसोमास्ततः परम् ।
वचनावाततश्शम्मा ऽश्वन्नस्तोममिति द्वयम् २०
अन्ते छेकस्समाख्याता वेयेविंशतिसंख्यकाः ।
असाविदे द्वितीये च जगृह्माते द्वितीयके ।
चतुर्थे चाथ वृत्रस्य त्वा द्वये च सखान्तिमे ।
गृणे तदिन्द्रप्रथमे यस्य त्यच्छं चतुर्थके ।
पवस्व सोमामहेऽत्र स्वादिष्ठयाष्टमे ततः ।
इषे पवा पुनाप्लव इहो इहेति कीर्तितः ।
अपामिवेदूर्मयस्तावाहर्यता द्वितीयके ।
धर्तादिवो द्वितीये च पवित्राद्ये तथैव च ।
इन्द्रमच्छद्वितीये च तृतीये च ततस्मृतः ।
आसोतापरिषिञ्चताथ प्रथमसामनि २०
वेयेष्ठञ्च समाख्याता एकविंशति संख्यकाः ।
शन्नः प्रथमे मूर्द्धान्त्य आरोहानद्यनोपरे । इन्द्रोदधीच प्रथमेऽभित्वाशूय ऋते ततः । अभित्वा पूर्वपीतये सं त्वा हिन्वे तथाशिश । अन्ते चैव जगृह्माते ब्रह्मान्ते स्वरतोत्तमे । अया वीती द्वितीये च हो इयापद्मसंज्ञके । तवाहमाद्येऽयापवापवस्वेति द्वयोस्मृतः । पवित्रन्ते द्वितीये च प्रधन्वा सो तृतीयके । सोमः पुनाद्वितीये च कीर्तितः ष्ठञ्च संज्ञकः २१
अनिधनं वेयगाने चतुर्विं शतिरुच्यते । मूर्द्धानं

दिव इत्यन्तेऽग्निं नरो द्वयपुरुद्वये । तद्वो गायचतुर्थे
च गव्योषुणो द्वितीयके । कदावसोप्रथमके पिबा
सुतस्य मध्यमे । असाविदे द्वितीये च जग्रह्मा ते च
पञ्चसु । प्रवोमहे द्वितीये च यं वृत्रेषु द्वयं तथा ।
अत्ताद्ये च सखामद्ध्ये पिबान्ते च प्रकीर्तितः ।
स्वादिष्ठयाष्टमे परिप्रियेति प्रथमे तथा ।
हो इयापद्मसंज्ञे च प्रोक्तमेतेषु सामसु २४
ह-त्सु-अ-मं-पि-र्ग-प्र-स्व-हि-क-म-षुरा-स्त-वि-न्नु-
वृ-भ-ह-हो-अ-न्वि-ग-वृ इति वेये चतुर्विं शत्यक्षरं
मध्यधार्यकम् उल्लेखिताक्षरं तेन पदे नात्र क-यते ।

४ ३ ३ ४ ३० ३ ४ ० ३० ३
शश्वत्तमं ह । गर्भ इवे त्सु । यदिवीरोत् । प्रमं ।

३ ० ४० ३ ४ ३ ४ ३० ४ ३ ३
सोमो अयं सुतः पि । घृतैर्ग । अभिप्र । नस्व ।

३ ३ ४ ३ २ ४ ३ ० ४ ३ ०
न हि । न कि ष्टं क । उदुत्येम । शग्ध्यूषु ।

३०० ३ ३ ४ ० ३ ० ३ ४० ३०
योरा । कस्त । यस्सत्राहा वि । उपोपेन्नु ।

३ ४ ० ३ ४० ३ ० ४ ३ ० ४ ३ ० ४ ३ ०
सघातं वृ । पूष्णोभ । अयारुचाह । अग्निं हो ।

३ ४ ० ३ ० ३०४ ० ३ ० ३ ४० ३
आसोमस्वानोत् । योदेवान्वि । मदेनसहग ।

३ ४ ३ ४ ३ ० ४ ३०
इन्द्रमच्छसुता इमे वृ । इति त्रयोविंशत्सामसु चतुर्विं
शदक्षरं मध्यधार्य संज्ञमुक्तमिति २४ चतुर्विं शति
सामात्रबृहदूपासमन्वितं पान्तमाद्यं संरूपाद्यं योगे योगे

द्वितीयकम् । ऋायाह्युपनइत्युक्तं त्वामिद्धिप्रथमं तथा ।
नसीमदेव इत्युक्तं कस्तमिन्द्रेति चादिकं ।
इद्राग्नी ऋपादियमितीन्द्राहा उ सखान्तिकम् ।
चन्द्रमा ऋप्स्वन्तरे च चतुर्थे स्यान्तिमं ततः ।
उच्चाते सप्तमं प्रोक्तं यस्ते षष्ठमतः परम् ।
उपोषु जातद्वितीयं प्रयत् गावो ऋयापवा ।
ऋाते दक्षं परीतोषि द्वितीयञ्चाष्टमन्तथा ।
तवाहं प्रथमं प्रोक्तं प्राणाशिशुर्द्वितीयकम् ।
ऋासो द्वितीयमित्युक्तमेतमुत्यञ्च पञ्चमम् २४
चतुर्विं शतिरत्रोक्तं या ऋौहोवेति मध्यतः । ऋश्वन्नत्वा
द्वितीये च कायमानो द्वितीयके । मूर्द्धानं दिव इत्यन्ते
प्रहोताजात ऋादिमे । पुरुद्वयेऽरमश्वाद्ये तमिन्द्रं वा
तृतीयके । य ऋानयद्वितीये च प्रसंम्राजं चतुर्थके ।
हावात्रेन्द्रोदधीचाद्ये महित्रीणां द्वितीयके । पिबासु
ततृतीये च यदिन्द्रनाहुषीषु च । ऋदर्दरुत्परे य एक
इद्वितीयकेऽन्तिमे । ऋयंऽसहस्रप्रथमउच्चाद्वादशके
स्मृतम् । परिप्रियाद्वये प्रोक्तमया पवाद्वये ततः २४
त्रयस्त्रिंशद्वेय गाने ऋादिच्छेकःप्रकीर्त्तितः । ऋश्वन्नत्वा
द्वितीये च शन्नोदेवी द्वितीयके । कायमानो द्वितीये
च प्रहोताजात ऋादिमे । तमिन्द्रं वा तृतीये च य
ऋानयद्वितीयके । ऐहीयैही प्रसंमाजं चतुर्थेऽत्राहगो
द्वये । महित्रीणां द्वितीये च पिबासु तत्रतीयके ।
यदिन्द्रनाभिवोवीरं कुष्ठः कोवामदर्दरुत् । द्वितीये
थजगृह्माते दक्षिणन्तु तृतीयके । शुद्धाशुद्धीयके

चाद्येऽभित्यां मेषं यएक इत् । द्वितीये च तृतीये च ततो धाहीन्द्रगिर्वणः । तृतीये थ द्वादशक उच्चास्वादिष्ठसप्तमे । परिप्रिया द्वये ततः परिस्वानो द्वितीयके । आपवस्वसहस्त्रिणं प्रकाव्यमुशने द्वये । अभिप्रिया पञ्चमके प्रधन्वा युग्मतुद्वयोः । ३३ । पञ्चत्रिंशद्वेयगाने मद्ध्योपानिधनं स्मृतम् । शन्नो देवीरिति युग्मेकायमानद्वितीयके । आरोहानिति जज्ञान अत्रायुगलके तथा । गौर्द्धयाद्येकयामद्ध्ये इन्द्रा दधीच आदिमे गव्योषुणो यथेत्याद्य उक्तं चयत्रृते तथा । इमाउत्वा पुरूमद्ध्येऽभित्वा पूर्वयदिन्द्रना । कस्तमिन्द्रत्वा द्वितीये इम इन्द्राय सुन्विरे । कुष्ठःकोवा मित्ययं वां मधुमत्तम इत्यपि । कश्यपस्य सुवर्विदा अभित्यां मेष इत्यपि । सखाय आशिषेत्याद्ये यस्य प्रथमसामनि । आयाह्ययं तमिन्द्रं जोऽग्निं होतारमितीरितम् परिस्वानासद्वितीय आविशन् कलशं तथा । आपवस्वेत्युपा उपप्रधन्वा सोमचतुर्षु
२५ वेये सामानि कथ्यन्ते स्तोभैर्विरहितानि च ।
चत्वारिंशदथैतानि क्रमस्तेषामथोच्यते ।
अग्ने मृडमहां अद्य आवोराजानमध्वरम् ।
पुरुत्वा दा चतुर्थञ्च पन्यं पन्यमितीरितम् ।
सदाव इन्द्रस्तरणिरित्सिषाद्यमतः परम् ।
उदुत्ये मधुयोनिश्च विधुंदद्रात्यमूषु च ।
आद्यं चतुर्णामेतेषां त्रातारञ्च ततःपरम् ।
सताहणं द्वितीयञ्च तत आनो वयो वयः ।

अर्चतप्रार्चतानरोविभोष्ट इन्द्रराधसः ।
आद्यमेदुमधोरुक्तं य इन्द्रसोतुचेतुना ।
वेत्थाहि निर्ऋृती नाम भ्रातृव्यो अनातुवां ।
यो ना इदमिदं सा इदं तस्ते प्रथमं ततः ।
आविर्मर्या अथाष्टममुच्चाते जातमन्धसः ।
इन्द्रायेन्दो द्वितीयमित्ययासोमसु कृत्यया ।
पुनान्त्यं पञ्चमं प्रातु जनित्राद्यं तथैव च ।
प्रगायते त्यधियदा एष प्रकोश इत्यपि ।
प्रोयासीत् प्रद्वितीयमिन्द्राय प्रथमं तथा ।
इन्द्रमान्त्यं सोमः पुनाद्वितीयं पञ्चमं ततः ।
आद्यं प्रोक्तमभिद्युम्नं ससुन्वेयश्चतुर्त्थकम् ४०
द्विपञ्चाशत्समाख्यातं वेयेपदमतः परम् ।
तर्जन्याद्यं कनिष्ठान्तं तथा चैतन्निदर्शनम् ।
तिवो वागौतमे यो विश्वातृतीयन्तु वो स्मृतम् ।
आसिताग्रेयपोवाच प्रमंहिष्ठीयकेस ओ ।
द्वितीये च चतुर्त्थे च स्त ओमा नो हृणी स्मृतम् ।
तमिन्द्रं प्रथमे षभो उद्धे द्वितीयकेषिसू ।
इम उत्वा यथोवाच देवानां भ्यमुकीर्तितम् ।
रेवतीर्नाभिर्मोवेति योगे प्रथमके द्रमू ।
एषो उषाश्विनो वाथ स्वपोवाच इमास्त इ ।
अयाधियाम ओ वेन्द्र इषे प्रथमके तु वो ।
इमा उत्वा सुतेनधोवा तश्चिदिन्द्रनः स्त्रवो ।
कदुप्रचेतसे स्यवोमितोवाच त्वमंगते ।
इन्द्रक्रतुमशो वेति तृतीये बराम्महान्महो ।

हिरो वापाहिगायुग्मे वस्यां इन्द्रासिमे यरो ।
यदिद्रशासो ऋव्रतं धिबोवा परिकीर्तितम् ।
कदाचनस्य पोवेति युंक्ष्वा हि वृत्रहन्तिरो ।
ऋात्वा गिरोरथीनधोप्रत्यस्मैनान देघ्वनो ।
प्रप्रवस्तिष्टुभं विवोतन्ते तृतीयके हरो ।
क्रत्वामहां ऋनुञ्रमोऽस्तुश्रौषाणनधो तथा ।
ऋसाव्यंशुर्द्वितीये च निमो वा परिकीर्तितम् ।
वधोवेति परिस्वानः प्रथमे पञ्चमेऽन्तिमे ।
ऋसृक्षान्ते रयो वेति पवस्व देव ऐहधो ।
परिस्वानास ऋादिमे तिधोवेति प्रकीर्तितम्
ऋयावीतीपरिस्त्रवप्रथमे च वतो स्मृतम् ।
पुनानस्सोमधेत्यत्र हिरोवा सप्तमे स्मृतम् ।
एकादशे परीतोष्यां ममोवेति ततः परम् ।
तवाहं सोमरारण तृतीये च तितो स्मृतम् ।
मृज्यप्रथमके तुर्ये पञ्चमे षष्ठकेभियो ।
पवस्व देववीतये द्वितीये च मनो स्मृतम् ।
त्वं ह्यङ्गदे तृतीये चतुर्थे च यघोस्मृतम् ५२
मृ-व-श्व-त्त-इ-वी-ह-क्र-था-ष-त्वा-इ-द्र-ऋ-ऋ-द-रु-
हू-म-रु-स-ज-र-पू-सहि-त्रा-नि-द्र-त्रा-व-नु-नां-वि-
म्न-स्सु-रं-ग-य-म-म-णु-क्ष-त-जि-वि-ल-म-ना-म-म-
स्वा-म-दि-म-दे-उ-ष्वा-तृ-ब-भ्रो-द्य-सो-ङ्यु-प-र्य-
न-न्ति-न-स-नु-व-द्दे-वे-ष-यो-नि-ऋ-सी-न्ति-वा-सु
८२
चतुर्थधार्यकं वेये ऋशीति द्वयमक्षरम् ।

उल्लेखि ताक्षरन्तेन पदेनात्र प्रकथ्यते

३ ३० ३ ४ ३ ० ४ ० ४ ३ ४
अग्नेमृ । अयन्नादेव । शश्वत्त । गर्भ इ ।

३ ४ ० ४ ३ ० ४ १ ० ० ४ ४ ३
यदिवी । बृहते शुक्र । णीथा । वृष । इम

४ ० ४ ३ ४ ३ ४ ३ ० ४ ० ३ ० ४ ०
उत्वा । अयन्त इन्द्र । अस्ति सोमो अ । सोमोअ

३ ४ ० ४ ० ४ ३ ० ४ ३ ४ ३ ० ४ ०
तंवोद । परुहू । अस्माकमद्यीरु । आत्वास ।

४ ० ३ ४ ० ४ ३ ४ ० ४ ३ ४ ० ३ ० ४
वाजयन्तोर । अभित्वापू । महस्तेसतोमहि ।

३ ४ ० ४ ३ ४ ४ ० ३ ० ४ ०
यस्सत्रा । सनि । अवद्र । सत्रा । योनोवनु ।

४ ० ० ३ ४ ० ३ ० ४ ३० ३ ० ४
जानां । असावि । योद्युम्नैर्द्युम्न । सोमस्सु ।

४ ३ ४ ० ३ ४ ३ ४ ० ३ ४ ३ ० ४
अरंग । आत्वारथं य । ययोर्विश्वम । एदुम

३ ४ ० ३ ४ ३ ४ ३ ४ ० ४ ० ३ ४
उपोषुशृणु । असृक्षतप्रवाजि । आविशन्कल ।

३ ४ ४ ० ३ ४ ० ३ ० ४ ० ० ४ ०
वह्निम । पुनानस्सेम । आसोमस्वा । सामदि ।

३ ४ ० ० ३ ० ४ ० ३ ४ ० ४ ३ ० ४ ०
प्रसोमदे । सोम उष्वाणस्सोतृ । पुरूणि बभ्रो ।

३ ४ ३ ४ ० ४ ३ ४
तक्षद्य । मनसो । मद्यु । जुष्टंप ।

३ ४ ३ ४ ४ ३ ४ ३ ४ ० ३ ० ४
परित्यं हर्य । बभ्रुं पुनन्ति । मदेन स । नोधनुव ।

३ ४०० ३०४ ० ३ ४ ३० ४ ३४०
बृहद्देवे । नाइषयो । तुसनि । ना इ षयो ग्र ।
३ ४० ० ४ ३ ४० ३४३ ४
प्रोयासी । हन्तिमधुवा । इंद्रमच्छसु । इति
षट्चत्वारिंशत्सामसु ग्रशीति द्वयमक्षरं चतुर्थधार्य
संज्ञं मुक्तमिति । उहुवाहा उवाचेति सामान्त्यं षट्
प्रकीर्तितं । ग्राघातृतीय ग्रात्वाससीदन्तो वयमुत्तरं ।
त्रिचतुर्थे परीतो ष्यां वेयगाने यथा क्रमम् ६
इति सामप्रकाशाख्ये वेयगानस्य कीर्तितम् ।
ग्रतः परमरगये गेयस्य गानस्य कथ्यते । एकं
कौथुमशाखायामाररायेकाह्वसंज्ञकं सप्तस्वरयुतं
सामप्रोक्तमत्रनिदर्शनम् १ । इमं वृषगामित्येकं
त्रिष्टुप्छन्दसि कीर्तितम् । १ एकं त्रिषामगीतञ्च त्रिषं
धिसामकीर्तितम् । नाम्नात्वमिन्द्रसंज्ञमरगये गेयगाने
नचान्यत्र । बृहता रथन्तरेग वामदेव्येन संयुतं ।
नोक्तमार्चिकमध्ये चनैवस्तो भेनैवप ग्रों ।
ग्रृत्पदं रूपमाररायेगेयेचाक्रन्दयेत्युक्तम् ।
एवाह्येवप्रभृतिभिर्यथार्चिकमद्ध्ये तथापदे ।
हि शब्दसहितमभिहितमररायेगेयेसिमायश्च १ ।
ग्रौहोवाहो इडायुक्तमेकमेवेदमीदृशम् ।
भ्राजमग्नेरितीलांदेऽररायेगाने प्रकीर्तितम् १
त्र्यन्तरं स्वरमाररये द्वयमाद्येश्विनोर्व्रते ।
हो इ हासाम्निनिधन ग्रहीसंलग्नमीरितम् २
ऊकारो निधनं प्रोक्तं पञ्चैवाररय सामसु ।
यद्या व इन्द्रतेऽष्टमे ग्रातूना इन्द्रवृत्रहन् ।

रौहिणे चो हुवौ होव ॥ थद्वितीये वयोमनाः ५
अरण्ये षट्समाख्याता ऋग्युग्मेन समन्विताः ।
अतीषं गाश्छते सर्वे तेषां स्तोत्राय कीर्तितम् ।
पुर उच्चासर्ज्यसाव्यमभीनवन्तरत्समम् ।
उदुत्यं चित्रमुभयं द्विसूर्ये संज्ञकेऽपि च ।
उदुत्यं जातवेदसमिन्द्रं नरश्च शम्बरे ६
अरण्ये हा उ वा स्तोभस्तर्जन्यादिप्रकीर्तितम् ।
पृथक्प्रत्युत्क्रमादग्रे षडेवात्र यथाक्रमम् । यद्यातृतीय
ओवेति होवेत्यष्टमसामनि । हावीन्द्रा इति हावौ
होमत्स्वावैराजसामनि । आहो एन्यौ समाख्या
तोन्याशब्दो वाग्ददेदय ६
कथ्यन्ते ष्टौ द्विस्वराणि सामान्यारण्यके यथा ।
सुवस्संसर्वआद्ये चाथाग्निमीडे पुरोहितं ।
अग्निरस्मिजन्मनाचतथाधर्मविधर्मवै ।
संत्वाभूतान्युवियुग्ममाद्यवर्जमतः परम् ।
अष्टमं कथितं चात्र प्रतिष्ठासामवागिति ८
अरण्येन वसामानि तृचानि कथितान्यतः ।
उच्चाशाक्वरयणवाख्यमिन्द्रमिद्गाथिनो बृहत् ।
अपत्यमुच्चतेजातं भ्राजादिपरिधीनिषट् ६
एकादशैव साम्नोक्तमारण्येदीप्तसंयुतम् । हावौहो वा
उ हो शब्दः इन्द्रज्येष्ठन्नओ स्मृतः । ए आसासाम्नि
वाशबस्त्वमिन्द्रष्याप्रकीर्तितः । हा उ रेवेति दाजामा
च त्रयः शब्दाः प्रकीर्तिताः । असाविदेपरे प्रोक्ता ई
कारा दशपञ्च च । मावोयादा च तत्रैव हुवौ हो इति

हो स्वरः । आप्रागादितिहो शब्दः प्रक्षस्य वृष्ण ऊ
द्वयम् । वृत्रहत्याय वेद्वयमूर्कत्रयमितीरितम् ।
पञ्चतिंशदिति प्रोक्ता आरण्ये दीप्तसंज्ञकाः । ११
आरण्ये द्वादशप्रोक्तं या औहोवेति मध्यतः ।
इया हो इया प्रथमकेऽयामायां च ततः परम् ।
अग्निर्म्मूर्द्धेत्युदुत्तममियहो इ सृपा द्वयम् ।
अयं वाया उधा मय दो हा ओहा इधेनुयत् ।
आनोब्रुवे दशस्तोभे प्रोक्तमेतेषु सामसु १२
आरण्ये द्वादशप्रोक्तं वा औहेवेति मध्यतः ।
उववीहेत्युवा ओ वा कायमानो न्तिमे ततः ।
ओ वा सन्ते पयांस्युक्तं विश्वाधनानि रौहिणे ।
उहुवौ हो वे त्युदितमियौहोवेति कीर्तितम् ।
रूपं वाग्वयोहो इ द्वादशैव यथाक्रमम् १२
पञ्चदशसामसहितः स्थितसंधिः कथित आरण्ये ।
इट् इडे स्तोभे सर्वत्र ट् कारे कीर्तितो यथा ।
औहोवेति तवेदिङ्प्रथमे हस् बृहन्नमः ।
अभ्याभूरिति हस्प्रोक्तः सकारयुगले तथा ।
वीहायवायमन्निति यशस्यास्मिन्नितीरितः ।
अग्नेयुंक्ष्वेति हस्प्रोक्तो यज्ञायानिधनत्रये ।
आतून इति चत्वारो निधने स्वरवर्जितः ।
षट् सकारे हसिप्रोक्तो हाहावङ्गिरसां व्रते ।
अर्चिश्शोचिः प्रत्यये द्वे सकारे हसितीरितः ।
नमः त्सेतिस्मृतोदेवव्रतमध्यमके ततः ।
एवाह्येवेति हंकारे ह्रस्वे सर्वत्र कीर्तिताः १५

उक्त आरण्यके च्छेकस्त्रयोविंशतिरन्त्यजः । ऐरा
यादत्रहाशब्दस्तवेदिन्द्राग्निमेभिरा । होवा इयेत्यत्र
हो आ च क्राद्येहा प्रकीर्तिताः । आनोहियमनादोहा
हाशब्दो बलभिद्द्वये । भद्रसामनि हाशब्दः
श्रेयस्सामनियास्मृतः त्वमिमासामनि होवाहा ओवा
क्साम्नियूस्मृतः । इमा उवां द्वि विष्टये द्वे ऐ हाशब्द
ईरितः । इडासाम्नितुताशब्द इहौहोहाप्रकीर्तितः ।
आयुस्साम्नि तु ता एवाहं भूमिर्द्या प्रकीर्तितः । द्यौ
स्साम्निकथितोमेतिज्योतिस्साम्नि तु तास्मृतः २३
ऋग्वर्जितं स्तोभमयं सप्तत्रिंशच्च संख्यया । अरण्ये
कथितं सामतेषामुल्लेखनं ततः । पतिर्द्विवस्ततो हा
उ हो हा इ प्रभृतीनि च । यज्ञाविवर्जितानीहहुवेवाचां
द्वयं तथा । अगन्मज्योतिरे वाहिसोमा सोमेत्यतः
परम् । इलान्दप्रथमे देवव्रतानि त्रीण्यहोकहो ।
इमा इडा द्वयमिति स्वयंस्कुन्वा इ च द्वयम् ।
आयुरेवाहिरे वाच वयोमना द्वयं तथा । ऊक्धर्म्म
भूमिर्द्यौर्ज्योतिस्संत्वा भूतान्यतः परम् । सहो भ्राजोद्यं
लोकावागुन्नयामीति कीर्तितम् । ३७ ऊन चत्वारिंश-
त्साम आरण्ये ष्ठञ्च अरितः । अयामाया न्ततोऽग्नि-
र्म्मूर्द्धादिपातीरुदुत्तमम् । इयहो इ उ व हो इ
चर्षणी द्वे सुवस्ततः । सृपात्रीणि द्वयो स्वादोरयं वा
क्रन्दयोपि च । अभ्याभूः प्रियवीहायहावीन्द्रामित्यु
वा तथा । धामयत्कायमानोऽन्त्येप्रसोन्त्येऽचिक्रदद्वये ।
विश्वेषां शुक्रचन्द्राभ्यामोवासन्तेपया तथा ।

सम्मितात्द्ये दशस्तोभेऽभि प्रघ्नेत्यत्र सर्वतः ।
उहुवौ हो तथेयौ हो अथ चास्मिन्निती इति
स्वयं स्कुन्वेततोऽन्तर्देवेषुष्ठञ्च प्रकीर्तितः ३६
चतुः पञ्चाशदीकारा आरण्येनिधनं स्मृतम् ।
यद्द्यावसप्तमे शन्नो देवीरिन्द्रं नरो द्वये ।
अयामाया औहोवा एहियाहा उ ततः परम् ।
तस्मात्संत्वानोनवुश्च होवा इयेति कीर्तितम् ।
इन्द्रोराजा द्वयेप्रोक्तमुदुत्तममियद्वये । चिदोहमा
इहीहाहुंप्रयच्चक्रमरादिमे । हो इयाहो इया
वाथ प्राणादिदशकेऽपि च । विश्वतो दावन्
प्रथमे स्वादोस्संकृत्यथाग्रिमे । विश्वेषामथया
माख्येनाकेसुपर्णसामनि । हा उ हो वा हा इयज्ञेति
पञ्चमे वाग्ददेति च । कश्यकह्वाविन्द्रामैरयन्नाप्रागादि
पञ्चके । हुप्सामनीयौ होवाच ततो विराडजायत ।
वयोमनो वयश्चाद्ये ज्योतिर्दिदीहिषट् तथा । शम्बरे
चैव कथितमीकारो निधनं तथा ५४
उहुवा हा उवा चेति गा न आरण्यके च षट् ।
हावौ हो ऽभित्वा वृषभा औहो आत्वा सहा तथा ।
इन्द्रज्येष्ठं बृहत्सामहुवौ हो इति पञ्चमम् ।
यज्ञायथा हसेष्वन्तं योरयिं वोऽस्प्रकीर्तितम् ।
समाप्तमिदमारण्ये गाने सामप्रकाशकम् ।
इति सामप्रकाशकं समाप्तम्

Reference:
"Sāmaprakāśana," in Krishnaswami Srauti, ed. *Chhalaprakriyādayo*, Kumbakonam: Jyotirvilasa Press, 1885.